सन्धानस्थले यद्यपि पद्मान्यधर्म्मिकपङ्कजातत्वान्वयधीसामान्यं प्रति पङ्कजपदं पद्मशक्तमित्येवं रूढ़िज्ञानत्वेन न विरोधित्वं तादृशधीसत्त्वेऽपि कर्द्दमजादिशब्देभ्यस्तादृश्येण कैरवादेरवगमात् नापि पङ्कजपदजन्यतादृशबोधं प्रत्येव तथा विरोधित्वं रूढ़िज्ञानदशायामपि समुदायस्य लक्षणया शक्तिभ्रमेण वा पङ्कजपदात् पङ्कजातत्वेन कुमुदबोधस्य सर्व्वैरुपगमात् तथाप्यवयवशक्त्या पङ्कजपदजन्यपद्मान्यधर्म्मिकपङ्कजातत्वान्वयबोधं प्रत्येव रूढ़िज्ञानत्वेन प्रतिबन्धकत्वम्। नच कुमुद एव पद्मत्वेन रूढ़िभ्रमदशायां तादृश्येण कुमुदस्य बोधो न स्याद्विरोधिन्या रूढ़िधियः सत्त्वादिति वाच्यं पद्मान्यधर्म्मिकेत्यनेन पद्मत्वानवच्छिन्नविशेष्यताकत्वस्योक्तत्वात्। पद्मस्येव कुमुदस्यापि समुदायशक्यत्वधीदशायामवयवशक्त्या पङ्कजातं कुमुदमित्याकारकधीस्वीकारे तु कुमुदादिशक्तत्वज्ञानाजन्यत्वं नापि प्रतिबध्यं विशेषणीयम्। नच यत्र तात्पर्य्यादिधीविलम्बादयोग्यताभ्रमादिना प्रतिबन्धाद्वा रूढ्योपस्थिते पद्मे योगार्थस्य पङ्कजनिकर्त्तुरनन्वयस्तत्रावयवशक्त्या पङ्कजातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढ़िज्ञानस्य सत्त्वादिति वाच्यं मीमांसकानामिष्टत्वात् ते हि मण्डपं भोजयेत्यादावपि गृहादौ रूढ़िधीसत्त्वे मण्डपादिपदानामवयवशक्त्या मण्डपानकर्त्रादेरन्वयं बोधं भ्रमत्वाग्रहानास्कन्दितस्यैव रूढ्यर्थगोचरतत्तदयोग्यताज्ञानाद्यभावविशिष्टस्यैव रूढ़िज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि च समुदाय एव पद्मत्वेन पङ्कजनिकर्त्तृत्वेन च शक्तिः प्रमाणमाभ्यां पङ्कजातं पद्ममित्याकारको बोधः प्रामाणिकस्तदानीं च पङ्कजनिकर्त्तृत्वेन कुमुदस्य नान्वयधीः तदावयवशक्तेरुपहाय पङ्कजपदघटकशब्दशक्त्येति प्रतिबध्यकुक्षौ निक्षेपणीयं तद्घटकत्वञ्च तद्विषयिताव्यापकविषयिताकत्वमात्रं तदवयव इव तत्राप्यविशिष्टम्। यत्तु स्वावयवशक्त्या पङ्कजपदजन्यं पङ्कजकर्त्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुस्तच्च कार्य्यस्य विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायस्तादात्म्यं वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्य्यादया कुमुदादेर्बोधव्युदाससम्भवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभाव पद्मत्वं पङ्कजप्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्तार्थे एव पर्य्यवसानादिति तत्तुच्छं पद्माग्रहीतशक्तिकस्यापि पुंसः पङ्कजनिकर्तृत्वेनावयवशक्त्या कुमुदस्य बोधानुदयप्रसङ्गात् नचेष्टापत्तिरनुभवविरोधात् नच रूढिज्ञानकालीनमेव योगार्थस्य बोधं प्रत्युक्तरीत्या पद्मत्वस्य हेतुत्वं तथा सति रूढिधीदशायामपि तदसमानकालीनस्य पङ्कजातत्वेन कुमुदबोधस्य सामान्यसामग्रीमहिम्ना दुर्व्वारतापत्तेः रूढिज्ञानासमानकालीनतादृशबोधं प्रति विशेषतो हेत्वन्तरस्याक्लृप्तत्वात् तत्कल्पने चातिगौरवात्। यदपि पङ्कजजनकर्तृषु पङ्कादिपदानां शक्तिसत्त्वेऽपि पङ्कजपदान्न तादृश्येण बोधः परन्तु पद्मत्वमात्रेण योगार्थमर्य्यादया पङ्कजातत्वप्रकारकबोधसामान्यं प्रत्येव पद्मत्वविशिष्टे रूढिज्ञानस्य लाघवेन विरोधित्वात् पद्मान्यधर्म्मिकत्वादेर्गौरवेण प्रतिबध्यकोट्यप्रविष्टत्वादतो योगरूढ़ं नामैव नास्ति युधिष्ठिरादिशब्दादपि रणस्थिरत्वादिकं योगार्थं परित्यज्यैव वैजात्यादिप्रकारेण कुन्तीपुत्राद्यवगमात्। यदुक्तमभियुक्तैः।

या वृत्तिरजहत्स्वार्था सेयमत्रोपपादिता।
जहत्स्वार्था तु तत्रैव यत्र रूढ़िर्व्विरोधिनी।
पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिरः॥

इति। तदेतद्वैयाकरणमतं पङ्कजमस्तीत्यादितः पङ्कजातं पद्ममस्तीत्याद्यनुभवस्य न्यायमीमांसादिसकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयमन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तेर्लाघवे पङ्कजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढ़िधियः प्रतिबन्धकत्वस्य सुवचत्वात्। नन्वेवं ह्रदे सरसिजमस्तीत्यादितो ह्रदनिष्ठं सरोजमिव ह्रदाभिन्ने सरसि जातं पद्ममपि प्रतीयेत नामार्थयोरभेदान्वये तन्त्रस्य नाम्नोः समानविभक्तिकत्वस्यानयादिति चेत् सत्यं सविभक्तिकनामार्थस्य नामान्तरार्थान्वये वृत्तिशब्दैकदेशार्थेनैव समानविभक्तिकनामान्तरेण स्मारितत्वस्य तन्त्रतायाः स्वीकार्य्यत्वादिति।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते॥

इति रूढ्यर्थयोगार्थयोर्युगपदुपस्थितौ तयोराकाङ्क्षादिसाचिव्यादाहत्यान्वयबुद्धिस्थल एव योगार्थस्य रूढ्यर्थस्य वा नान्यत्रान्वयो ननु तयोरेव मिथः साकाङ्क्षत्वं अन्यत्र योगार्थस्य बोधने रूढ़िधियः प्रतिबन्धकत्वं वा प्रमाणाभावात् एवञ्च यत्र योगरूढ़िलभ्यार्थयोस्तात्पर्य्याद्यग्रहाद्विरोधिसमवधानाद्वा न प्रथममन्वयधीस्तत्र योगार्थमर्य्यादया पङ्कजातत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन स्थलकमलस्य बोधो भवत्वेवेति मणिकृन्मतं दर्शयति।

'रूढ्यर्थेऽन्यत्र या यत्र यदाकाङ्क्षादिनिश्चयः।
तदैव तत्र योगार्थस्यान्वयो मणिकृन्मतः॥'

समुदायशक्त्युपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र धर्म्मिण्यवान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षानिश्चयादिस्तदैव तत्र तथान्वयबोध उत्पद्यते सम्भूतसामग्रीकत्वात् रूढ्यर्थभिन्ने योगार्थस्यान्वयबोधव्युदासाय तु रूढेर्योगापहारिताप्रवादो रूढ्यर्थमात्रे योगार्थस्यान्वयबोधसामग्री-स्यलाभिप्रायक इति चिन्तामणिकृतां मतम्।

योगरूढ़ं विभजते।

'सामासिकं तद्धितात्कमिति तत् द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥'

तत् योगरूढ़ं सामासिकं समासात्मकं जलसर्पादि तद्धितात्कं वासुदेवादि। कृदन्तस्य पङ्कजादियोगरूढ़स्य सामासिक एवान्तर्भाव इति नाधिक्यम्॥ * ॥)

योगवाहः, पुं, (योगस्य वाहः। योगं वाहयतीति। वह + णिच् + अण् वा।) अनुस्वारः। विसर्गः। जिह्वामूलीयः। उपध्मानीयः। इति व्याकरणम्॥

योगवाही, स्त्री, (योगं वाहयतीति। वह + णिच् + अण्। ततो ङीष्।) क्षारविशेषः। यथा,—
"स्वर्ज्जिस्तु स्वर्ज्जिकाक्षारी योगवाही सुवर्चिका।"
इति हेमचन्द्रः॥
पारदश्च॥ (पुं, रोगविशेषे मिलितानामौषधानां प्रयोगः। यथा,—
"योगवाहिरसाः सर्व्वे सर्व्वरोगगलग्रहे॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे॥)

योगसारः, पुं, (योगस्यौषधप्रयोगस्य सारः।) सर्व्वरोगहरणोपायः। यथा,—
धन्वन्तरिरुवाच।
"सर्व्वरोगहरं सिद्धं योगसारं वदाम्यहम्।
शृणु सुश्रुत! संक्षेपात् प्राणिनां जीवहेतवे॥
निमेषादिद्वैविःकालश्चिन्ताभिः षड्विधो भवेत्॥
कषायकटुतिक्ताल्परूक्षाहारादभोजनात्।
चिन्ताव्यवायव्यायामभयशोकप्रजागरात्॥
उच्चैर्भाष्यतिभाराच्च कर्म्मयोगातिकर्षणात्।
वायुः कुप्यति पर्य्यन्ते जीर्णेऽह्नि दिनसंक्षये॥
उष्णाम्ललवणक्षारकटुकाजीर्णभोजनात्।
तीक्ष्णातपाग्निसन्तापमद्यक्रोधनिषेवणात्॥
विदाहकाले भुक्तस्य मध्याह्ने जलदागमे।
ग्रीष्मकालेऽर्द्धरात्रेऽपि पित्तं कुप्यति देहिनः॥
स्वाद्वम्ललवणस्निग्धगुरुशीतातिभोजनात्।
नवान्नपिच्छलानूपमांसाभिष्यन्दिसेवनात्॥
अव्यायामो दिवास्वप्नशय्यासनसुखादिभिः।
कफः प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति॥
भावव्यङ्गसङ्कोचतोदविष्टम्भभोजनात्।
खरता सुप्तता हर्षरोमस्तम्भनशोषणम्॥
श्यावत्वमङ्गविक्षेपवल्गनाशामवर्त्तनम्।
वायोर्लिङ्गानि तैर्युक्तं रोगं वातात्मकं वदेत्॥
दाहोष्णपादसंक्लेदकोपरागपरिस्रवाः।
कट्वम्लशववैगन्ध्यस्वेदमूर्च्छातितृट्भ्रमाः॥
हारिद्रं हरितत्वञ्च पित्तलिङ्गानि तैर्युतः।
स्नेहोपदेहमाधुर्य्यचिरकारित्वबन्धनम्॥
स्तैमित्यहर्षसंघातशोथशीतत्वगौरवम्।
कण्डुनिद्राभियोगश्च लक्षणं कफसम्भवम्॥
हेतुलक्षणसंसर्गाद्विद्याद्व्याधिं द्विदोषजम्।
सर्व्वहेतुसमुत्पन्नं त्रिलिङ्गं सान्निपातिकम्॥
दोषधातुमलाधारो देहिनां देह उच्यते।
तेषां समत्वमारोग्यं क्षयवृद्धी विपर्य्ययः॥
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।
वातपित्तकफा दोषा विण्मूत्राद्या मलाः स्मृताः।
वायुः शीतो लघुः सूक्ष्मः खरो रूक्षोऽस्थिरो बली।
पित्तमम्लकटूष्णञ्च पक्वोणोरोमकारणम्॥
मधुरो लवणः स्निग्धो गुरुः श्लेष्मातिपिच्छिलः।